Home Page

# The Fourteen Kālī-s of Samvartamaṇḍala



Of the myriad forms of Bhagavatī Mahākālī, twelve/thirteen forms are discussed by various sampradāyas of Trika Tantra.

Abhinavagupta discusses the system of Twelve Kālī-s quoting sārdhaśatika:

द्वादशारं महाचक्रं रश्मिरूपं प्रकीर्तितम् ।
नाम चैव प्रवक्ष्यामि रश्मीनां तु यदास्थितम् ॥
सृष्टिः स्थितिश्च संहारो रक्तकाली तथैव च ।
स्वकाली यमकाली च मृत्युकाली तथैव च ॥
रुद्रश्च परमार्कश्च मार्ताण्डश्च ततः परः ।
कालाग्निरुद्रकाली च महाकाल्यभिधा पुनः ॥

dvādaśāraṃ mahācakraṃ raśmirūpaṃ prakīrtitam |
nāma caiva pravakṣyāmi raśmīnāṃ tu yadāsthitam ||
sṛṣṭiḥ sthitiśca saṃhāro raktakālī tathaiva ca |
svakālī yamakālī ca mṛtyukālī tathaiva ca ||
rudraśca paramārkaśca mārtāṇḍaśca tataḥ paraḥ |
kālāgnirudrakālī ca mahākālyabhidhā punaḥ ||

Based on this list, the Twelve Kālī-s are:

1 Sṛṣṭikālī
2 Sthitikālī
3 Saṃhārakālī
4 Raktakālī
5 Svakālī (Sukālī )
6 Yamakālī
7 Mṛtyukālī
8 Rudrakālī (Bhadrakālī )
9 Paramārkakālī
10 Mārtāṇḍakālī
11 Kālāgnirudrakālī
12 Mahākālī (Parākālī, Mahākālakālī, Kālakālī )

The thirteenth Kālī is also listed in Tantrāloka:

महाभैरवशब्दश्च घोरशब्दस्ततः परः |
चण्डकाली पदं चान्ते त्रयोदश उदाहृताः ||

mahābhairavaśabdaśca ghoraśabdastataḥ paraḥ |
caṇḍakālī padaṃ cānte trayodaśa udāhṛtāḥ ||

Thus, the thirteenth kAlI is महाभैरवघोरचण्डकाली (Mahābhairavaghoracaṇḍakālī ).

The same list of thirteen is also discussed in Tantrarāja Bhaṭṭāraka:

सृष्टिकाली च संहारे सृष्टौ सा परमेश्वरी |
स्थितिकाली तथा घोरा ततः संहारकालिका ||
रक्तकाली चर्वयन्ती रक्तौघमविभेदतः |

सुकाली यमकाली च मृत्युकाली भयावहा ||
भद्रकाली तथा चान्या परमादित्यकलिका |
मार्ताण्डकाली कालाग्निरुद्रकालमहोल्बणा ||
महाकालकुले काली महाभैरवकालिका |
त्रयोदशविधा काली विज्ञेया नामभेदतः ||

sṛṣṭikālī ca saṃhāre sṛṣṭau sā parameśvarī |
sthitikālī tathā ghorā tataḥ saṃhārakālikā ||
raktakālī carvayantī raktaughamavibhedataḥ |
sukālī yamakālī ca mṛtyukālī bhayāvahā ||
bhadrakālī tathā cānyā paramādityakalikā |
mārtāṇḍakālī kālāgnirudrakālamaholbaṇā ||
mahākālakule kālī mahābhairavakālikā |
trayodaśavidhā kālī vijneyā nāmabhedataḥ ||

The dhyānas of the thirteen Kālī-s presented below are from various sources such as Kramasadbhāva, Pancaśatika, Cidgaganacandrikā, and Kramastotra.

**1. Sṛṣṭikālī**

कौलार्णवानन्दघनोर्मिरूपां
उन्मेषमेषोभयभाजमन्तः |
नीलीयते नीलकुलालये या
तां सृष्टिकालीं सततं नमामि ||

मन्त्रोदया व्योमरूपा व्योमस्था व्योमवर्जिता |
सर्वा सर्वविनिर्मुक्ता विश्वस्मिन् सृष्टिनाशिनी ||
या कला विश्वविभवा सृष्टर्थकरणक्षमा |
यदन्तः शान्तिमायाति सृष्टिकालीति सा स्मृता ||

विश्वसंहृतिपदे लयोज्झिते
लीयसे यदि निरंशतः शिवे |
सृष्टिकाल्यसि यया बहिः पदे
क्षिप्तमम्ब जगदाशु गृह्यसे ||

kaulārṇavānandaghanormirūpāṃ
unmeṣameṣobhayabhājamantaḥ |

nīlīyate nīlakulālaye yā
tāṃ sṛṣṭikālīṃ satataṃ namāmi ||

mantrodayā vyomarūpā vyomasthā vyomavarjitā |
sarvā sarvavinirmuktā viśvasmin sṛṣṭināśinī ||
yā kalā viśvavibhavā sṛṣṭarthakaraṇakṣamā |
yadantaḥ śāntimāyāti sṛṣṭikālīti sā smṛtā ||

viśvasaṃhṛtipade layojjhite
līyase yadi niraṃśataḥ śive |
sṛṣṭikālyasi yayā bahiḥ pade
kṣiptamamba jagadāśu gṛhyase ||

**2. Sthitikālī**

वाजिद्वयस्वीकृतवातचक्र-
प्रकान्तसंघट्टगमागमस्थाम् |
शुचिर्ययास्तं गमितोऽर्चिषा तां
शान्तां नमामि स्थितिनाशकालीम् ||

हासिनी पौद्गली येयं बालाग्रशतकल्पना |
कल्पते सर्वदेहस्था स्थितिः सर्गस्य कारिणी ||
यदुत्पन्ना तु सा देवि पुनस्तत्रैव लीयते |
तां विद्धि देवदेवेश स्थितिकालीं महेश्वर ||

लब्धमास्यपवनं च या हृतं
वातचक्रमधितस्थुषी शिवे |
निर्गमागममहोज्झितान्तरा
त्वं स्थितं ग्रससि हि स्थिताम्बिके ||

vājidvayasvīkṛtavātacakra-
prakāntasaṃghaṭṭagamāgamasthām |
śuciryayāstaṃ gamito.arciṣā tāṃ
śāntāṃ namāmi sthitināśakālīm ||

hāsinī paudgalī yeyaṃ bālāgraśatakalpanā |
kalpate sarvadehasthā sthitiḥ sargasya kāriṇī ||
yadutpannā tu sā devi punastatraiva līyate |
tāṃ viddhi devadeveśa sthitikālīṃ maheśvara ||

labdhamāsyapavanaṃ ca yā hṛtaṃ
vātacakramadhitasthuṣī śive |
nirgamāgamamahojjhitāntarā
tvaṃ sthitaṃ grasasi hi sthitāmbike ||

**3. Saṃhārakālī**

उन्मन्यन्ता निखिलार्थगर्भा
या भावसंहारनिमेषमेति |
सदोदिता सत्युदयाय शून्यां
संहारकालीं मुदितां नमामि ||

चण्डकाली शुद्धवर्णा यामृतग्रसनोद्यता |
भावाभावविनिर्मुक्ता विश्वसंहाररूपिणी |
तत्र सा याति विलयं सा च संहारकालिका ||

आत्मभावमखिलस्य जग्मुषी
त्वं शिवे निरवधिः सदोदिता |
भावसंहृतिनिमेषविग्रहा
संहृतं कलयसि ह्यनावृतिः ||

unmanyantā nikhilārthagarbhā
yā bhāvasaṃhāranimeṣameti |
sadoditā satyudayāya śūnyāṃ
saṃhārakālīṃ muditāṃ namāmi ||

caṇḍakālī śuddhavarṇā yāmṛtagrasanodyatā |
bhāvābhāvavinirmuktā viśvasaṃhārarūpiṇī |
tatra sā yāti vilayaṃ sā ca saṃhārakālikā ||

ātmabhāvamakhilasya jagmuṣī
tvaṃ śive niravadhiḥ sadoditā |
bhāvasaṃhṛtinimeṣavigrahā
saṃhṛtaṃ kalayasi hyanāvṛtiḥ ||

**4. Raktakālī**

महाविनोदार्पितमातृचक्र-
वीरेन्द्रकासृग्रसपानसक्ताम् |

रक्तीकृतां च प्रलयात्यये तां
नमामि विश्वाकृतिरक्तकालीम् ||

न चैषा चक्षुषा ग्राह्या न च सर्वेन्द्रियस्थिता |
निर्गुणा निरहङ्कारा रञ्जयेद्विश्वमण्डलम् |
सा कला तु यदुत्पन्ना सा ज्ञेया रक्तकलिका ||

mahāvinodārpitamātṛcakra-
vīrendrakāsṛgrasapānasaktām |
raktīkṛtāṃ ca pralayātyaye tāṃ
namāmi viśvākṛtiraktakālīm ||

na caiṣā cakṣuṣā grāhyā na ca sarvendriyasthitā |
nirguṇā nirahaṅkārā ranjayedviśvamaṇḍalam |
sā kalā tu yadutpannā sā jneyā raktakalikā ||

**5. Sukālī**

डकला भीषणा रौद्रा कुलकालिनिराकुला |
अलक्ष्या लक्ष्यनिर्लक्ष्या सुकाली नाम सिद्धिदा ||

कालपावकमुखं शिवान्तकं
विश्वमब्धिपतितोदबिन्दुवत् |
पूर्णतां वहति यत्र दीप्तिचित्
घस्मरी त्वमिह साधुकाल्यसि ||

ḍakalā bhīṣaṇā raudrā kulakālinirākulā |
alakṣyā lakṣyanirlakṣyā sukālī nāma siddhidā ||

kālapāvakamukhaṃ śivāntakaṃ
viśvamabdhipatitodabinduvat |
pūrṇatāṃ vahati yatra dīpticit
ghasmarī tvamiha sādhukālyasi ||

**6. Yamakālī**

सर्वार्थसङ्कर्षणसंयमस्य
यमस्य यन्तुर्जगतो यमाय |

वपुर्महाग्रासविलासरागात्
सङ्कर्षयन्तीं प्रणमामि कालीम् ||

यमरूपस्वरूपस्था रूपातीतस्वरूपगा |
सा कला लीयते यस्यां यमकाली तु सा स्मृता ||

एतदम्ब सदिदन्तु नेति नः
शङ्कया हृदि विकल्पलक्षणः |
यो यमः स खलु काल्यते त्वया
भूतसंयमनकेलिकोविदः ||
अम्ब कार्यकरणे नियच्छतः
पूर्णचित्पदमहोत्सवत्विषः |
जृम्भितस्य हृदये स्वशङ्कया
त्वं यमस्य वपुषासि भीषणा ||
प्राण एष यमकाल उच्यते
मध्यवाहतनुरग्निमम्ब यः |
रुद्रमेतदुपनोय खं परं
तत्र सर्गविमुखं करोष्यसौ ||

sarvārthasaṅkarṣaṇasaṃyamasya
yamasya yanturjagato yamāya |
vapurmahāgrāsavilāsarāgāt
saṅkarṣayantīṃ praṇamāmi kālīm ||

yamarūpasvarūpasthā rūpātītasvarūpagā |
sā kalā līyate yasyāṃ yamakālī tu sā smṛtā ||

etadamba sadidantu neti naḥ
śaṅkayā hṛdi vikalpalakṣaṇaḥ |
yo yamaḥ sa khalu kālyate tvayā
bhūtasaṃyamanakelikovidaḥ ||
amba kāryakaraṇe niyacchataḥ
pūrṇacitpadamahotsavatviṣaḥ |
jṛmbhitasya hṛdaye svaśaṅkayā
tvaṃ yamasya vapuṣāsi bhīṣaṇā ||
prāṇa eṣa yamakāla ucyate
madhyavāhatanuragnimamba yaḥ |

rudrametadupanoya khaṃ paraṃ
tatra sargavimukhaṃ karoṣyasau ||

**7. Mṛtyukālī**

ममेत्यहङ्कारकलाकलाप-
विस्फारहर्षोद्धत गर्वमृत्युः |
ग्रस्तो ययाघस्मरसंविदं तां
नमाम्यकालोदितमृत्युकालीम् ||

ओमित्येषा कुलेशानी मृत्य्कालान्तपातिनी |
मृत्युकालकला यस्याः प्रविशेद्विग्रहं शिवम् |
तदा सा मृत्युकालीति ज्ञेया गिरिसुताधव ||

वित्तदारमुखभोग्यगामिनी
या ममेत्यभिमतिर्मदोद्धता |
याप्यहङ्कृतिरनात्मनि स्थिता
मृत्युरूपमुभयं तवासनम् ||
विश्वमम्ब कुरुषे तवासनं
मृत्युसेचनमखण्डितोदया
चिद्विकल्पमयमन्तरुद्यमं
गामनाहितजगत्क्रमां घ्नती ||

mametyahaṅkārakalākalāpa-
visphāraharṣoddhata garvamṛtyuḥ |
grasto yayāghasmarasaṃvidaṃ tāṃ
namāmyakāloditamṛtyukālīm ||

omityeṣā kuleśānī mṛtykālāntapātinī |
mṛtyukālakalā yasyāḥ praviśedvigrahaṃ śivam |
tadā sā mṛtyukālīti jneyā girisutādhava ||

vittadāramukhabhogyagāminī
yā mametyabhimatirmadoddhatā |
yāpyahaṅkṛtiranātmani sthitā
mṛtyurūpamubhayaṃ tavāsanam ||
viśvamamba kuruṣe tavāsanaṃ
mṛtyusecanamakhaṇḍitodayā

cidvikalpamayamantarudyamaṃ
gāmanāhitajagatkramāṃ ghnatī ||

**8. Rudrakālī**

विश्वं महाकल्पविरामकल्प-
भवान्तभीमभ्रुकुटिभ्रमन्त्या |
याश्रात्यनन्तप्रभवार्चिषा तां
नमामि भद्रां शुभभद्रकालीम् ||

इदं सर्वमसर्वं यत् संहारान्तं तु नित्यशः |
कुटिलेक्षणरेखान्तग्रस्तमस्तमितं च यत् ||
ततो बोधरसाविष्टा स्पन्दमाना निराकुला |
दीधितीनां सहस्रं यद्वमेच्च पिबते भृशम् |
सा कला लीयते यस्यां रुद्रकालीति सा स्मृता ||

गमागमसुगम्यस्था महाबोधावलोकिनी |
मायामलविनिर्मुक्ता विज्ञानामृतनन्दिनी ||
सर्वलोकस्य कल्याणी रुद्रा रुद्रसुखप्रदा |
यत्रैव शाम्यति कला रुद्रकालीति सा स्मृता |
भेदस्य द्रावणाद्भद्रा भद्रसिद्धिकरीति या ||

सक्रमाक्रमविमिश्रभावत-
स्त्वक्रमस्त्रितय चारुवीक्षणा |
तुर्यरश्मिमणविक्रमैकभू-
स्त्वं क्रमत्रिगुणभीमकाल्यसि ||

viśvaṃ mahākalpavirāmakalpa-
bhavāntabhīmabhrukuṭibhramantyā |
yāśrātyanantaprabhavārciṣā tāṃ
namāmi bhadrāṃ śubhabhadrakālīm ||

idaṃ sarvamasarvaṃ yat saṃhārāntaṃ tu nityaśaḥ |
kuṭilekṣaṇarekhāntagrastamastamitaṃ ca yat ||
tato bodharasāviṣṭā spandamānā nirākulā |
dīdhitīnāṃ sahasraṃ yadvamecca pibate bhṛśam |
sā kalā līyate yasyāṃ rudrakālīti sā smṛtā ||

gamāgamasugamyasthā mahābodhāvalokinī |
māyāmalavinirmuktā vijnānāmṛtanandinī ||
sarvalokasya kalyāṇī rudrā rudrasukhapradā |
yatraiva śāmyati kalā rudrakālīti sā smṛtā |
bhedasya drāvaṇādbhadrā bhadrasiddhikarīti yā ||

sakramākramavimiśrabhāvata-
stvakramastritaya cāruvīkṣaṇā |
turyaraśmimaṇavikramaikabhū-
stvaṃ kramatriguṇabhīmakālyasi ||

**9. Paramārkakālī**

अस्तोदितद्वादशभानुभाजि
यस्यां गता भर्गशिखा शिखेव |
प्रशान्तधाम्नि द्युतिनाशमेति
तां नौम्यनन्तां परमार्ककालीम् ||

एकाकिनी चैकवीरा सुसूक्ष्मा सूक्ष्मवर्जिता |
परमात्मपदावस्था परापरस्वरूपिणी ||
सा कला पररूपेण यत्र संलीयते शिवः |
सा कला परमार्केति ज्ञेया भस्माङ्गभूषण ||

astoditadvādaśabhānubhāji
yasyāṃ gatā bhargaśikhā śikheva |
praśāntadhāmni dyutināśameti
tāṃ naumyanantāṃ paramārkakālīm ||

ekākinī caikavīrā susūkṣmā sūkṣmavarjitā |
paramātmapadāvasthā parāparasvarūpiṇī ||
sā kalā pararūpeṇa yatra saṃlīyate śivaḥ |
sā kalā paramārketi jneyā bhasmāṅgabhūṣaṇa ||

**10. Mārtāṇḍakālī**

मार्ताण्डमापीतपतङ्गचक्रं
पतङ्गवत् कालकलेन्धनाय |
करोति या विश्वरसान्तकां तां
मार्ताण्डकालीं सततं प्रणौमि ||

शब्दब्रह्मपदातीता षट् त्रिंशान्तनवान्तगा |
ब्रह्माण्डखण्डादुत्तीर्णा मार्ताण्डी मूर्तिरव्यया |
सा कला लीयते यस्यां मार्ताण्डी कालिकोच्यते ||

यो मृताण्डनिभमर्थपञ्चकं
प्राणिनः स्फुरति भामयो रविः |
संहृतार्धमनुमन्तराहृतं
तं बहिः सृजति चार्थपञ्चकम् ||
संहृतोर्ध्वनिकरस्तुतावधि
व्यक्तमण्डतनुरम्ब भास्करम् |
काललक्षण कला प्रदीप्तये
त्वं हि विश्वरसभक्षमास्थिता ||
भूतचक्रमधुकोशसंभृतं
तत्तदर्थमधु पातुमुत्सुका |
यन्मरीचिविषयाः सभास्करः
त्वद्रुचौ शलभवत्प्रलीयते ||

mārtāṇḍamāpītapataṅgacakraṃ
pataṅgavat kālakalendhanāya |
karoti yā viśvarasāntakāṃ tāṃ
mārtāṇḍakālīṃ satataṃ praṇaumi ||

śabdabrahmapadātītā ṣaṭtriṃśāntanavāntagā |
brahmāṇḍakhaṇḍāduttīrṇā mārtāṇḍī mūrtiravyayā |
sā kalā līyate yasyāṃ mārtāṇḍī kālikocyate ||

yo mṛtāṇḍanibhamarthapa¤cakaṃ
prāṇinaḥ sphurati bhāmayo raviḥ |
saṃhṛtārdhamanumantarāhṛtaṃ
taṃ bahiḥ sṛjati cārthapa¤cakam ||
saṃhṛtordhvanikarastutāvadhi
vyaktamaṇḍatanuramba bhāskaram |
kālalakṣaṇa kalā pradīptaye
tvaṃ hi viśvarasabhakṣamāsthitā ||
bhūtacakramadhukośasaṃbhṛtaṃ
tattadarthamadhu pātumutsukā |
yanmarīciviṣayāḥ sabhāskaraḥ
tvadrucau śalabhavatpralīyate ||

## 11. Kālāgnirudrakālī

कालक्रमाक्रान्तदिनेशचक्र-
क्रोडीकृतान्ताग्निकलाप उग्रः ।
कालाग्निरुद्रो लयमेति यस्यां
तां नौमि कालानलरुद्रकालीम् ॥

वरदा विश्वरूपा च गुणातीता परा कला ।
अघोषा सा स्वरारावा कालाग्निग्रसनोद्यता ॥
निरामया निराकारा यस्यां सा शाम्यति स्फुटम् ।
कालाग्निरुद्रकालीति सा ज्ञेया मखवन्दित ॥

kālakramākrāntadineśacakra-
kroḍīkṛtāntāgnikalāpa ugraḥ |
kālāgnirudro layameti yasyāṃ
tāṃ naumi kālānalarudrakālīm ||

varadā viśvarūpā ca guṇātītā parā kalā |
aghoṣā sā svarārāvā kālāgnigrasanodyatā ||
nirāmayā nirākārā yasyāṃ sā śāmyati sphuṭam |
kālāgnirudrakālīti sā jneyā makhavandita ||

## 12. Kālakālī

नक्तं महाभूतलये श्मशाने
दिक्खेचरीचक्रगणेन साकम् ।
कालीं महाकालमलं ग्रसन्तीं
वन्दे ह्यचिन्त्यामनिलानलाभाम् ॥

ऋतोज्ज्वला महादीप्ता सूर्यकोटिसमप्रभा ।
कलाकलङ्करहिता कालस्य कलनोद्यता ।
यत्र सा लयमाप्नोति कालकालीति सा स्मृता ॥

यः श्मशान इह भूतघस्मरे
रज्यतेऽम्ब करवीरनामनि ।
ग्राहकं ग्रससि तं श्रुतं महा-
कालमप्यसुहुताशदुर्ग्रहाः ॥

naktaṃ mahābhūtalaye śmaśāne
dikkhecarīcakragaṇena sākam |
kālīṃ mahākālamalaṃ grasantīṃ
vande hyacintyāmanilānalābhām ||

ṛtojjvalā mahādīptā sūryakoṭisamaprabhā |
kalākalaṅkarahitā kālasya kalanodyatā |
yatra sā layamāpnoti kālakālīti sā smṛtā ||

yaḥ śmaśāna iha bhūtaghasmare
rajyate.amba karavīranāmani |
grāhakaṃ grasasi taṃ śrutaṃ mahā-
kālamapyasuhutāśadurgrahāḥ ||

**13. Mahābhairavacaṇḍograghorakālī**

क्रमत्रयत्वाष्टमरीचिचक्र-
सञ्चारचातुर्यतुरीयसत्ताम् |
वन्दे महाभैरवघोरचण्ड-
कालीं कलाकाशशशङ्ककान्तिम् ||

दशसप्तविसर्गस्था महाभैरवभीषणा |
संहरन् भैरवान् सर्वान् विश्वं च सुरपूजित ||
सान्तः शाम्यति यस्यां च सा स्याद्भरितभैरवी |
महाभैरवचण्डोग्रघोरकाली परा च सा ||

kramatrayatvāṣṭamarīcicakra-
sancāracāturyaturīyasattām |
vande mahābhairavaghoracaṇḍa-
kālīṃ kalākāśaśaśaṅkakāntim ||

daśasaptavisargasthā mahābhairavabhīṣaṇā |
saṃharan bhairavān sarvān viśvaṃ ca surapūjita ||
sāntaḥ śāmyati yasyāṃ ca sā syādbharitabhairavī |
mahābhairavacaṇḍograghorakālī parā ca sā ||

The fourteenth and the mysterious K**ālasaṅkarṣiṇī** is described thus:

श्रीमत्सदाशिवपदेऽपि महोग्रकाली
भीमोत्कटभ्रुकुटिरेष्यति भङ्गभूमिः ।
इत्याकलय्य परमां स्थितिमेत्य काल-
सङ्कर्षिणीं भगवतीं हठतोऽधितिष्ठेत् ।।

भूतभाविभवदर्थगर्भितं
कालघस्मरमुपास्यते वपुः ।
कालकर्षिणि वहन्ति योगिनः
कृष्णतः प्रभृति विश्वरूपताम् ।।

śrīmatsadāśivapade.api mahograkālī
bhīmotkaṭabhrukuṭireṣyati bhaṅgabhūmiḥ |
ityākalayya paramāṃ sthitimetya kāla-
saṅkarṣiṇīṃ bhagavatīṃ haṭhato.adhitiṣṭhet ||

bhūtabhāvibhavadarthagarbhitaṃ
kālaghasmaramupāsyate vapuḥ |
kālakarṣiṇi vahanti yoginaḥ
kṛṣṇataḥ prabhṛti viśvarūpatām ||

Kālasaṅkarṣiṇī, the essence of the samvartamaṇḍala and of kālīkula, has been absorbed into śrīvidyā as well. Paraśurāma kalpasūtra includes its own miniature form of Kālasaṅkarṣiṇī in raśmimālā. Cidambara Tantra, mahālakṣmī ratnakośa, paramānanda tantra, baḍabānala tantra etc. include
[illegible] nāya of śrīvidyā

Facebook Twitter LinkedIn

As Kālī is the Ultimate Power that manifests everything and is the power of consciousness which is perfectly free and accountable for every phenomenon, she is called Vyomavāmeśvarī. She is also called Kālasaṅkarṣiṇī as she is not limited by time (kāla) and is identical to Bhāsā (encompassing sṛṣṭi, sthiti, saṃhāra and anākhya). She is also

Sri Kamakoti
Mandali

© 2018 All rights Reserved. Design by Concept Web Designs